# काण्वमाध्यन्दिनपरम्परानुसारम्
# ईशावास्योपनिषदो मन्त्रक्रममन्त्रपाठयोर्भेदस्तत्समीक्षा च

*प्रो. सुधांशुशेखर शास्त्री*

**आनन्दचरणयुगलामकलङ्कशशाङ्कमण्डलच्छायाम् ।**
**तन्मण्डलाधिरूढां तत्कलयाकलितचित्कलांनौमि ॥**

इहतावद् विमृश्यते किञ्चिद् ''ईशावास्यमिदं सर्वमि''त्यादि वेदान्तप्रकरणम्। तत्र वेदान्तोनामाध्यात्मशास्त्रम् ''अध्यात्मविद्या विद्यानाम्'' इति विश्वगुरूणाऽकारणबन्धुनोद्घोष्यमाणवैभवम्। आत्मतत्त्वप्रतिपादकत्वाच्चास्य दर्शनत्वम्। यद्यपि दर्शनान्तरस्यापि दर्शनत्वमात्मतत्त्वप्रतिपादनादेव, परमार्थत आत्मन एव तत्त्वपदार्थत्वात्। तथापि साक्षाद् ब्रह्मात्मैक्यरूपतत्त्वप्रतिपादनपरत्वेन प्रामुख्यं सर्वेष्वपि दर्शनेषु शास्त्रेषु च वेदान्तशास्त्रस्यैव। अतएव पर्यवस्यन्ति सर्वाणि शास्त्राणि दर्शनानि.सोपानपरम्परयाऽत्रैव। तदुक्तं मीमांसाशिरोमणिभिर्भट्टपादैः—

**इत्याहनास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्रयुक्त्या ।**
**दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन ॥ इति**

(श्लो० वा० 148)

श्रीमदुदयनाचार्यैरपि—

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।**
**उपासनैव क्रियते श्रवणानन्तरागता ॥**

(न्या० कु० 1/4) इति।

**न ग्राह्यभेदमवधूय धियोऽस्तिवृत्ति**
**तद् बाधने बलिनि वेदनये जयश्रीः ।**
**नो चेदनित्यमिदमीदृशमेव विश्वं**
**तथ्यं तथागतमतस्य तु कोऽवकाशः ॥**

(आ०त०वि० 2) इति च

एवं व्याकरणादिशास्त्राणामप्यत्र पर्यवसानादेव साफल्यम्। ''रक्षोहागमलघ्वसंदेहाः प्रयोजनम्'' रक्षार्थं वेदानामध्येयं व्याकरणमित्याद्युक्तेः।

वेदान्तदर्शनस्य मूलस्वरूपं वेद एव। सच मन्त्रब्राह्मणोभयात्मकः। भगवता बौधायनेन ''मन्त्रब्राह्मणमित्याहुः'' (बौ०गृ० 2/62) इति। स्वकीये धर्मसूत्रे ''आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि'' (कौ० सू० 1/3) इति कौशिक धर्मसूत्रे कौशिकेन आपस्तम्बकात्यायनाभ्याञ्च ''मन्त्रब्राह्मणयोर्वेदनामधेयम्'' (आप० 24/1/31, कात्या० 1/1) इत्युभयोरपि भागयोवेदत्वमभ्युपगतम्।

''काण्डत्रयात्मकोवेद'' इत्यक्त्यनुसारेण चतुर्ण्णामपि ऋग्यजुःसामाथर्ववेदानां कर्मोपासनाज्ञानभेदेन काण्डत्रयात्मकत्वम्। तत्र सर्वत्रापि काण्डत्रयाणां मध्ये ज्ञानकाण्डस्यैव प्राधान्यम्। इतरकाण्डद्वयस्या-नित्यफलकत्वादस्य च नित्यफलकत्वात्। धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षस्यैव ''न स पुनरावर्तते'' (छा० 8/15/1) इत्यादिश्रुत्या नित्यत्वावगमात्। अतएव मोक्षस्य परमपुरुषार्थत्वम्। इतरेषां त्रयाणां मध्ये द्वयोरर्थकामयोः प्रत्यक्षेणानित्यत्वावधारणात्। धर्मस्य चातिन्द्रियत्वेन प्रत्यक्षागम्यत्वेऽपि ''तद्यथा कर्मचितो लोकः क्षीयते एवमेवामुत्र

पुण्यचितोलोकः क्षीयते'' (छा० 8/1/5) इत्यादिश्रुत्या ''क्षीणे पुण्ये मर्त्यलोकं विशन्ति'' (गी०) इत्यादिस्मृत्या चानित्यत्वावगमसम्भवात्।

ननु ''अपाम सोमममृताअभूम'' ''अगन्म ज्योतिरविदाम देवान्'' ''अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतंभवति'' इत्यादिश्रुत्या स्वर्गादेरपि नित्यत्वमवगम्यत इति चेन्न ''तद्यथा'' इत्यादि श्रुतिविरोधेन तेषां वाक्यानामाकल्पं सन्तानाविच्छेदात्मकापेक्षिकानित्यत्वप्रतिपादनपरत्वात्—तदुक्तम्—''आभूतसंप्लवस्थानममृतत्वं हिभाष्यते'' इति। अतएव भगवताभाष्यकृता ''अविद्ययामृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते'' (ईश उ० 11) इति मन्त्रस्य विचारणां कुर्वता ''अमृतमश्नुत'' इत्यस्य ''आपेक्षिकममृतम्'' इति व्याख्यानं विहितम्। तत्रैव भाष्यटीकाकारेणाप्युक्तम्-मुख्यामृतत्वग्रहणे हिरण्यमयादिमन्त्रेण द्वारामार्गयाचनमनुपपन्नं स्यादिति। तस्मान्नित्यमोक्षफलकं ज्ञानकाण्डमेवाभ्यर्हितं काण्डान्तरापेक्षयेति निश्चप्रचम्।

एतेन ब्राह्मणभागस्य तदन्तर्गतोपनिषद्भागस्य च वेदबहिर्भूतत्वाक्षेपोऽपि निरस्तः।

तदेव च ज्ञानकाण्डमुपतिषच्छब्दवाच्यतां भजते। यद्यप्युपनिषच्छब्दस्य विशरणगत्यवसादनार्थकोपनि-पूर्वकसद्धातोर्निष्पन्नत्वेनाविद्यानिवर्तकब्रह्मविद्यावाचकत्वमस्ति। यथाह भगवान् भाष्यकारः—''उपशब्दो हि सामीप्यमाह। तच्चासति सङ्कोचके प्रतीचि पर्यवस्यति। निशब्दश्च निश्चयार्थः। तस्मादैकात्म्यं निश्चितम्, तद्विधा सहेतुं संसारं सादयतीत्यु-पनिषदुच्यते'' (बृ०भा०) इति।'' ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसधोपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद् हिंसनाद् विनाशादित्यर्थयोगेन विद्योपनिषदित्युच्यते। पूर्वोक्तविशेषणान् मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगाद् ब्रह्मविद्योपनिषदिति (कठ०उ०भा० 1/1/1) इति च। तथापि आयुर्वैघृतमितिवत् ज्ञानकाण्डस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः। विद्यायां मुख्ययावृत्त्या ग्रन्थे तु भक्त्येत्यन्यत्। अत एव ''उपनिषदमधीमहे'' ''उपनिषदमध्यापयाम इत्यादि व्यवहारोऽपि सङ्गच्छते। एषा ब्रह्मविद्यैव 'द्वे विद्येवेदितव्ये पराचैवापरा चे'' त्यादिविद्याविभागे मुण्डके पराविद्याशब्देनाप्युच्यते।

अस्यैवोपनिषदात्मकज्ञानकाण्डस्य वेदान्त इत्यन्वर्थ नामधेयम्। उपनिषदां प्रायोवेदचरमभागरूपत्वात्। वेदस्यान्तः=अन्तिमो भाग इति व्युत्पत्तिसम्भवात्। वस्तुतस्तु ''अन्तःस्वरूपेनिकटे प्रान्ते निश्चयनाशयोरिति कोषप्रामाण्यादन्तः शब्दस्य निश्चयवाचकत्वेन निश्चितार्थमादाय सिद्धान्तशब्दस्येव वेदान्त शब्दस्यापि वेदेनान्तो निश्चितो निर्णीतो योऽर्थः, स एव वेदान्त इति व्युत्पत्तिसम्भवात् वेदान्तप्रतिपाद्योऽर्थः ब्रह्मैव वेदान्तशब्दस्यार्थः। तत्प्रतिपादकत्वादेवोपनिषत्स्वपि, वेदान्तशब्दस्य प्रयोगः। अत एवोपनिषदर्थे वेदान्तशब्दस्य प्रयोगोऽनेकत्रोपलभ्यते। तद् यथा—वेदान्तं परमं गुह्यम् (श्वे० 6/22) वेदान्तविज्ञानसुनिश्चितार्थाः'' (मु० 3/2/5) वेदान्ते प्रतिष्ठितः'' (म०ना० 10/8) ''वेदान्तविद्वेद-विदेवचाहम्'' (गी० 15/5) इत्यादि। अत एव ''उपनिषदोवेदान्ताः'' (गौ. ध. सू. 19/13) इति गौतमेनाप्युक्तम्। तथाच प्रोक्तदिशा उपनिषद एव वेदान्ताः सन्ति मुख्यतया।

तत्रास्ति यजुर्वेदः कृष्णशुक्लभेदेन द्विधाविभक्तः। आहत्य च द्वयोरप्येकशतसंख्याकाः शाखा आसन्निति ''एकशतमध्वर्युशाखाः'' इति महाभाष्यकारोक्त्याऽवगम्यते। किन्तु तत्राधिक्येन कालकवलितप्रायाः (लुप्तप्रायाः), केवलं कृष्णयजुर्वेदस्य शाखात्रयं तैत्तिरीया, कठी, मैत्रायणीचेति, शुक्लयजुर्वेदस्य शाखाद्वयं काण्व माध्यन्दिनीचेति सौलभ्येनोपलभ्यते साम्प्रतम्। तत्र वमितत्वाद् वा मन्त्रब्राह्मणभागयोः पार्थक्यकरणे काठिन्याद् वैकस्य कृष्णत्वम्, साक्षादादित्यतो गृह्यमाणत्वान्मन्त्रब्राह्मणभागयोः पार्थक्येनोपलभ्यमानत्वाद् वाऽपरस्य शुक्लत्वमित्यन्यत्।

शुक्लयजुर्वेदीयसंहितायां चत्वारिंशदध्याया भवन्ति तत्र काण्वमाध्यन्दिनभेदेन द्वयोरपि शाखयोश्चत्वारिंशत्तमोऽध्याय ईशावास्योपनिषद्। तत्र व्यरचि भाष्यं काण्वशाखीयेशावास्योपनिषद एव भगवत्पादैः श्रीमच्छङ्कराचार्यैर्मुमुक्षुभाग्यविधातृभिः। माध्यन्दिनशाखीयेशावास्योपनिषदश्च श्रीमदुवटाचार्यविरचितं मन्त्रभाष्यं (उवटभाष्यं) श्रीमन्महीधरनिर्मितं वेददीपभाष्यं (महीधरभाष्यं) चोपलभ्येते। ''ईशावास्यमित्याद्यादिमं मन्त्रमादायैवास्या उपनिषद ''ईशावास्यमिति नामधेयम्।

तत्रारम्भतः ''स पर्यगादित्यष्टमकण्डिकां यावन्नक्रमभेदोऽपितु समान एवोभयत्र मन्त्राणां क्रमः। नवमकण्डिकातः काण्वमाध्यन्दिनशाखयोरस्ति मन्त्राणां भिन्नः क्रमः। स चेत्थम्–

| **काण्वशाखा** | **माध्यन्दिनशाखा** |
|---|---|
| **अन्धं तमः प्रविशन्तियेऽविद्यामुपासते ।** | **अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।** |
| **ततोभूय इवते तमो य उ विद्यायां रताः ॥9॥** | **ततोभूय इवते तमो ये उ संभूत्यां रताः ॥9॥** |
| **अन्य देवाहुर्विद्ययाऽन्यदाहुरविद्यया ।** | **अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।** |
| **इति शुश्रुम धीराणां येनस्तद् विचचक्षिरे ॥10॥** | **इति शुश्रुम धीराणां येनस्तद् विचचक्षिरे ॥10॥** |
| **विद्यां चाविद्यां च यस्तद् वेदोभयं सह ।** | **सम्भूतिं च विनाशं च यस्तद् वेदोभयं सह ।** |
| **अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥11॥** | **विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥11॥** |
| **अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।** | **अन्धं तमः प्रविश्यन्ति येऽविद्यामुपासते ।** |
| **ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥12॥** | **ततो भूय इव ते तमो य उ विद्यायां रताः ॥12॥** |
| **अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।** | **अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः ।** |
| **इति शुश्रुम धीराणां येनस्तद् विचचक्षिरे ॥13॥** | **इति शुश्रुम धीराणां येनस्तद् विचचक्षिरे ॥13॥** |
| **सम्भूतिं च विनाशं च यस्तद् वेदोभयं सह ।** | **विद्यां चाविद्यां च यस्तद् वेदोभयं सह ।** |
| **विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥14॥** | **अविद्यया मृत्यु तीर्त्वा विद्ययाऽमृतमश्नुते ॥14॥** |
| **हिरणमयेन पात्रेण सत्यस्यापिहितं मुखम् ।** | **वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।** |
| **तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥15॥** | **ओ३म् कतो स्मर क्लिबे स्मर कृतं स्मर ॥15॥** |
| **पूषन्नकेर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्** | **अग्नेनप सुपथा राये अस्मान् विश्वानि** |
| **समूह । तेजो यत्ते रूपं कल्याणतमं तत्ते** | **देव वयुनानि विद्वान् युयोध्यस्मज्जुहु-** |
| **पश्यामि योऽसावसौ पुरूषः सोऽहमास्मि ॥16॥** | **राणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥16॥** |
| **वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।** | **हिरणमयेन पात्रेण सत्यस्यापिहितं मुखम् ।** |
| **ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ॥17॥** | **योऽसावादित्ये पुरूषः सोऽसावहम् ॥17॥** |
| **अग्ने नय सुपथा राये अस्मान् विश्वानि** | **ओ३म् खं ब्रह्म ॥18॥** |
| **देव वयुनानि विद्वान् । युयोध्यस्मज्जुहु-** | |
| **राणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥18॥** | |

अत्रायमपि प्रकारः क्रमभेदज्ञानार्थम्–

यत्–काण्वशाखायां या नवमी कण्डिका सैव माध्यन्दिन शाखायां द्वादशी कण्डिका

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ,, | ,, दशमी | ,, | ,, | ,, | ,, | त्रयोदशी | ,, |
| ,, | ,, एकादशी | ,, | ,, | ,, | ,, | चतुर्दशी | ,, |
| ,, | ,, द्वादशी | ,, | ,, | ,, | ,, | नवमी | ,, |
| ,, | ,, त्रयोदशी | ,, | ,, | ,, | ,, | दशमी | ,, |
| ,, | ,, चतुर्दशी | ,, | ,, | ,, | ,, | एकादशी | ,, |
| ,, | ,, पञ्चदशी | ,, | ,, | ,, | ,, | सप्तदशी | ,, |
| ,, | ,, षोडशी | ,, | ,, | ,, | ,, | नास्त्येव | ,, |
| ,, | ,, सप्तदशी | ,, | ,, | ,, | ,, | पञ्चदशी | ,, |
| ,, | ,, अष्टादशी | ,, | ,, | ,, | ,, | षोडशी | ,, |
| | नास्त्येव | ,, | सा | ,, | ,, | अष्टादशी | ,, |

शाखाद्वये मन्त्राणामेतादृशक्रमभेदस्य सत्त्वेऽपि-अष्टादश संख्या तूभयत्र समैव।

किञ्च काण्वशाखायां षोडशी ''पूषन्नेकर्षे'' इत्याद्यात्मिका कण्डिकावर्तते। तत्रादित्यमण्डलस्थं पुरूषं ''योऽसावसौ पुरूष: सोऽहमास्मि'' इत्यनया रीत्या स्वाभिन्नतयाऽवलोकयितुं सूर्यरश्मीनुपसंहर्तुमादित्यं प्रति प्रार्थना प्रतिपादिता। किन्तु तस्या: पूर्वार्द्धं माध्यन्दिनशाखायां नास्त्येव। उत्तरार्द्धमपि तत्रनास्त्यपितु किञ्चित्पाठभेदेन माध्यन्दिनशाखाया: सप्तदशकण्डिकायामुत्तरार्द्धरूपेण वर्तते।

अपि च माध्यन्दिनशाखायां ''ॐ खं ब्रह्म'' इत्यात्मकोऽष्टादशतमो मन्त्रो विद्यते। स च काण्वशाखायां नास्त्येव। काण्वशाखाया अष्टादशतमो मन्त्र: ''अग्ने नय सुपथा'' इत्याधात्मको मार्गयाचनाप्रतिपादकोवर्तते।

एवं काण्वमाध्यन्दिनशाखीयमन्त्रेषु पाठभेदोऽपिवर्तते। सचेत्थम्—

1. उक्तशाखाद्वयेऽपि ''असुर्यानाम ते लोका'' इत्याद्यात्मकस्तृतीयोमन्त्र:। तस्योत्तरार्द्धे—

काण्वशाखायाम्-तांस्ते प्रेत्याभिगच्छन्ति'' इति पाठ:।

माध्यन्दिनशाखायाम्-तांस्ते प्रेत्यापिगच्छन्ति'' इति पाठ:। अर्थस्तु-ये आत्महनोऽविद्वांसस्तेऽसुर्यासंज्ञकान् लोकान् स्थावरान्तान् प्राप्नुवन्ति'' इति सम एवोभयत्र।

2. शाखाद्वयेऽपि चतुर्थोमन्त्र:-अनेजदेकम्'' इत्याद्यात्मक:। तस्य द्वितीयपादे-काण्वशाखायाम्-आप्नुवन्पूर्वमर्षत्'' इति मूर्धन्यषकारघटित: पाठ:। माध्यन्दिनशाखायान्तु-''पूर्वमर्शत्'' इति तालव्यशकारघटित: पाठ:।

तत्र काण्वशाखापाठे-ऋषीगतौ'' इति तौदादिकधातुमाश्रित्य-पूर्वमर्षत् पूर्वमेवगतम् व्योमवत्व्यापित्वात्'' इत्यर्थ: शाङ्करभाष्ये।

माध्यन्दिनशाखायान्तु-रिश् हिंसायाम्'' इति तौदादिकधातुमाश्रित्य-सूक्ष्मत्वात् पूर्वमर्शत् रिशतिर्हिंसकर्मा, अविनश्यदास्ते। अनादिनिधनामेत्यर्थ:'' इति श्रीमदुवटभाष्ये। महीधरभाष्येतु ''ऋशगतौ'' रिशहिंसायाम'' इति धातुद्वयमपि निर्दिश्य निरूक्तोभयविधोऽप्यर्थोऽङ्गीकृत:। किन्तु ऋशगतौ इति तालव्यशकारान्तोधातु: कौमुद्यां न दृश्यते।

3. शाखाद्वयेऽपि ''यस्तु सर्वाणिभूतान्यात्मन्येवानुपश्यति'' इत्याद्यात्मक: षष्ठोमन्त्र:। तस्य चतुर्थेऽन्तिमेपादे—

काण्वशाखायाम्—ततो न विजुगुप्सते'' इति पाठ:।

माध्यन्दिनशाखायान्तु—ततो न विचिकित्सति'' इति पाठ:।

तत्र काण्वशाखायाम्—न विजुगुप्सते = विजुगुप्सां घृणा न करोतीत्यर्थ:।

माध्यन्दिनशाखायाम्—न विचिकित्सति = न संशेते'' इत्यर्थ:।

सर्वत्रात्मदर्शिन: दृष्टावात्मातिरिक्तस्याभावान्न कुत्रापि घृणा नापि च संशयावकाश इत्युभयत्रापि भाव:।

4. काण्वशाखायाम्—''अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्याया'' इति दशमो मन्त्र:। तत्र—''विद्यया'' ''अविद्यया'' इति तृतीयान्त: पाठ:।

माध्यन्दिनशाखायाञ्च ''अन्यदेवाहुर्विद्याया अन्यदाहुरविद्याया'' इति त्रयोदशसंख्याको मन्त्र:। तत्र ''विद्याया:'' ''अविद्याया:'' इति षष्ठ्यन्त: पाठ:।

तत्र तृतीयान्तपाठे तृतीयार्थस्य हेतो: फलेनान्वय:। षष्ठ्यन्तपाठे च षष्ठ्यर्थस्य सम्बन्धस्य फलेनान्वय इति भावे न कश्चिद् विशेष:। अत्र काण्वशाखीयमन्त्रस्य शाङ्करभाष्ये विद्याशब्देन देवताज्ञानम्, अविद्याशब्देन चाग्निहोत्रादिलक्षणं कर्मगृहीतम्। तयोरेव समुच्चयसम्भवात्। ब्रह्मज्ञानेन सहकर्मण: समुच्चयस्यासम्भवाच्च।

माध्यन्दिनशाखायमन्त्रस्य महीधरभाष्येऽपिस्पष्टतयाऽयमेव पक्ष: परिगृहीत:। उवटभाष्ये यद्यपि विद्याशब्दस्यात्मज्ञानमर्थ: कृत:, किन्तु तत्राप्यात्मज्ञानेन देवतात्मभावरूपं ज्ञानमेव विवक्षितमिति प्रतिभाति। मुख्यात्मज्ञानेन

कर्मणां समुच्चयस्यासम्भवात्। अतएव महीधरभाष्ये "विद्यायामात्मज्ञाने देवताज्ञाने एव रता" इत्यत्रात्मज्ञाने" इत्यस्यार्थतया "देवताज्ञाने" इत्युक्तम्।

5. काण्वशाखायाम्—

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**

**तत्त्वं पूषन्नावृणु सत्यधर्माय दृष्टये"**

**इति पञ्चदशसंख्याको मन्त्रः।**

**अत्र "तत्त्वं पूषन्नपावृणु"** इत्यादि उत्तरार्द्ध विधते।

किन्तु-माध्यन्दिनशाखायाम्—

**हिरण्मयेन पात्रेणसत्यस्यापिहितं मुखम्।**

**योऽसावादित्ये पुरूषः सोऽसावहम्"** इत्यात्मकः

सप्तदशसंख्याको मन्त्रः। अत्र अन्यत्रापि च "तत्त्वं पूषान्नि" त्याद्युत्तरार्द्धं नास्ति अत्रत्यञ्च "योऽसावादित्ये" इत्यात्मकमुत्तरार्द्धं काण्वशाखायामन्त्रेऽत्रनास्ति, अपितु षोडशसंख्याकेमन्त्रे किञ्चित्पाठभेदेन वर्तते। अर्थस्तु शाखाद्वयेऽपि समान एव।

6. काण्वशाखायाम् "वायुरनिलमित्याधात्मकः सप्तदशसंख्याकोमन्त्रः। तत्र—"ॐक्रतोस्मरकृतं स्म क्रतो स्मर कृतं स्मर" इत्युत्तरार्द्धपाठः।

माध्यन्दिनशाखायान्तु स एव मन्त्रः पञ्चदशसंख्याकः। किन्तु तत्र "ओ३मक्रतो स्मर क्लिबे स्मर कृतं स्मर" इत्युत्तरार्द्धपाठः।

तत्र काण्वशाखायां हे क्रतो सकल्पात्मक? इत्यर्थः पुनर्वचनमादरार्थम्।

माध्यन्दिनशाखीयमन्त्रे "क्लिबे स्मर" इत्यतिरिक्तः पाठः। तस्य च "कल्पते भोगायेति क्लृप् लोक इति व्युत्पत्त्या क्लिबे स्मर इत्यस्य क्लृप्ताय लोकाय स्मर" इत्यर्थ उवटमहीधरभाष्ययोः। पुनर्वचनश्चात्र नास्त्येव। अवशिष्टांशस्यार्थ उभयत्र समानः।

7. माध्यन्दिनशाखायाम्—"ओ३म् खं ब्रह्म" इत्यात्मकोऽष्टादशसंख्याकोमन्त्रः। सच काण्वशाखायां नास्त्येव। ओइमिति नाम निर्देशो ब्रह्मणः। आकाशस्वरूपं ब्रह्म आत्मत्वेन ध्यायेत्। आकाशपदार्थश्च ब्रह्मैव" इत्यर्थः।

**अवगत ईशावास्योपनिषदः** कण्वमाध्यन्दिनशाखीयमन्त्राणां क्रमभेदः पाठभेदश्च। किन्तु किं तेन? "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ. 1-4-4) इति श्रुत्या मोक्षौपयिकात्मदर्शनोपायत्वेन विहितानि श्रवणमनननिदिध्यासनान्येवानुष्ठेयानि मुमुक्षुभिरिति ब्रूमः। मुमुक्षवो हि अत्राधिकृताः। मोक्षसाधनञ्च ब्रह्मत्मैक्यसाक्षात्कार एव "तमेव विदित्वा" इत्यादिश्रुत्या तस्यैव मोक्षसाधनत्वेनावगमात्। आत्मातिरिक्तप्रकाराणां मुक्त्यौपयिकवेदनविषयत्वे एवकारासङ्गतेः।

तत्र श्रवणन्नाम वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूलो मानसो व्यापारः। मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलस्तर्कात्मकज्ञानजनको मानसोव्यापारः। निदिध्यासनं नाम अनादि-दुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसोव्यापारः।

तथा च श्रवणार्थं संदिग्धानां वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यावधारणमावश्यकम्। तच्च तात्पर्यनिर्णायकैर्लिङ्गैरेव सम्पादनीयम्। तानि च लिङ्गानि षट्। तदुक्तम्—

**उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्।**

**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥** इति।

अस्मिन्प्राचीनपद्ये उपक्रमोपसंहाराभ्यामेकमेव लिङ्गमभिप्रेतम्। ताभ्यां पदाभ्यां तत्तद्विचार्यवाक्यीयाद्यन्त-भागनिष्ठमेकार्थपर्यवसायित्वं लक्षणया ज्ञाप्यते। द्वितीयं लिङ्गमभ्यासः। अभ्यासो नामानन्यपरं पुनःश्रवणम्। तृतीयं च लिङ्गमपूर्वत्वम्=प्रमाणान्तरागोचरत्वम्। तच्च प्रकृतवाक्यात् तदर्थविषयकज्ञानोत्पत्तेः प्राक् केनापि प्रमाणान्तरेणाज्ञातत्वम्। एवञ्चाज्ञातार्थज्ञापकत्वम, अनधिगतार्थगन्तृत्वं वेति मन्तव्यम्। चतुर्थं लिङ्गं फलम्। प्रकृतवाक्यार्थविषयकज्ञानस्य फलवत्त्वम्। पञ्चमं लिङ्गमर्थवादः। अर्थवादश्च स्तुतिनिन्दान्यतरप्रतिपादकं वाक्यमुच्यते। षष्ठञ्च लिङ्गमुपपत्तिः। सा चाबाधितत्त्वम्। अर्थात्प्रमाणान्तरेण प्रकृतवाक्यार्थस्याबाधित्त्वम्। एवञ्चैतेषु षट्सु लिङ्गेषुउपक्रमोपसंहारौ अभ्यासोऽर्थवादश्चेत्येतत्त्रयमतिप्रसङ्गवारकं शब्दनिष्ठं लिङ्गमित्य-भियुक्तैर्व्यवह्रियते। अपूर्वता, फलमुपपत्तिश्चेत्येतत्त्रयञ्च प्रामाण्यशरीरसम्पादकमर्थनिष्ठम्।

प्रकृतेषु-ईशावास्योपनिषन्मन्त्रेषु प्रायो दध्यङ्ङाथर्वणऋषिः, अनुष्टुप्छन्दः, आत्मादेवता। आत्मदेवत्यस्य-अनुष्टुप्छन्दस्कस्यास्याध्यायस्य दधीचाथर्वणेन दृष्टत्वात्तथानीश्चीयते । तत्रोक्तलिङ्गैस्तात्पर्यनिर्णयश्चेत्थम्—

तत्र-ईशावास्यमित्युपक्रमः, सपर्यगाच्छुक्रमिति ''ॐ खं ब्रह्म'' इति वोपसंहारः। ताभ्यामेकत्र तात्पर्यं निर्णीयते। अनेजदेकं मनसो जवीयः'' तदन्तरस्य सर्वस्य तदुसर्वस्यास्य बाधृतः'' इत्यादिरभ्यासः। नैनद्देवा आप्नुवन्पूर्वमित्यपूर्वता-कीर्तनम्।'' तत्रकोमोहः कः शोक एकत्वमनुपश्यतः'' इति फलवत्तासंकीर्तनम्।'' कुर्वन्नेवेह कर्माणि'' इति जिजीविषोर्भेददर्शिनः कर्मकरणानुवादेन ''असूर्यानाम ते लोका'' इति निन्दया ऐकात्म्यदर्शनस्य स्तुतत्वादर्थवादः। ''तस्मिन्नपो मातरिश्वा दधाति'' इत्युपपत्त्याभिधानमित्यनया रीत्या ईशवास्योपनिषदो ब्रह्मात्मैक्ये तात्पर्यं निश्चीयते। ईदृशेन च ब्रह्मात्मैक्यविज्ञानेन अज्ञाननिवृत्तिपुरःसरं परमानन्दावाप्तिर्मोक्षो भवतीति शिवम्।

* * *